दिनाङ्क :- 27.06.2025

प्रात: - 06:55

<u>शङ्घाई-सहयोग-स□घठन</u>

चीन देशे समायोजिते शङ्घाई-सहयोग-स□घठनस्य ररक्षामन्त्रिणाम् उपवेशने संयुक्त-घोषणापत्रे हस्ताक्षरं कर्तुं भारतेन निराकृतम्। यतोहि एतस्मिन् संयुक्त-घोषणापत्रे आतंक-सम्बद्धानां गतिविधीनां उल्लेखं नासीत्। रक्षामन्त्रिणा संयुक्त घोषणापत्रेस्य समर्थनं नैवकरणे सम्मेलनमतेत् संयुक्त विज्ञप्तिं विनैव समाप्तम् नवदेल्लयां वार्ताहरान्। सम्बोधयन विदेश मन्त्रालयस्य प्रवक्ता रणधीर-जायसवालः प्रोक्तवान् यत् भारतं वाञ्छति स्म यत् प्रपत्रेषु आतंकवादसम्बद्धाः चिन्तनीयविषयाः उल्लिखिताः स्युः परं तत् एकेन विशेषदेशेन अस्वीकार्यमासीत्। श्री जायसवालः प्रोक्तवान यत् उपवेशने रक्षामन्त्री राजनाथसिंहः सदस्य देशैः सर्वरूप-अभिव्यक्तिपरं आतंकवादं विरूध्य ऐक्यप्रदर्शनाय आह्वानं कृतवान्।

<u>एक्सिओम-स्थापना</u>

भारतेन गतदिने ऐतिह्यम् विरचितम्, यदा भारतीयवायुसेनादलस्य कैप्टन शुभांशु शुक्ला एक्सिओम-4 चालकम् इत्येतं समेत्य स्पेस-एक्स ड्रैगन अन्तरिक्षयानं अन्ताराष्ट्रियान्तरिक्षस्थानकेन- आईएसएस सह सफलतया भारतीय समयानुसारं सायं चतुर्वादने सम्मिलितम्। आईएसएस-याने चतुर्दश दिवसीय-वैज्ञानिक-अभियाने लखनऊनगरस्य शुभांशुशुक्ला अमेरिकी-पोलैण्ड्-हङ्गरी-देशानां अन्य-त्रिभिः अन्तरिक्षयात्रिभिः सह मिलित्वा हार्मोनी-मॉड्यूल्-इत्यत्र स्थापितः। नासा-समर्थनेन श्रीशुक्ला इसरो तथा जैवप्रौद्योगिकीविभागेन संयुक्तरूपेण विकसितानां अग्रणीजीवनविज्ञानप्रयोगानाम् नेतृत्वं करिष्यति। केन्द्रीयविज्ञानप्रौद्योगिकीमन्त्री डॉ. जितेन्द्रसिंहः शुक्ला एतस्मिन् अवसरे सर्वेभ्यः अभियानसम्बद्धेभ्यः स्वीय वर्धापनानि दत्तवान्।

## राष्ट्रिय-स्वयंसेवकसंघः

राष्ट्रिय-स्वयंसेवकसंघेन समाजवादी-धर्मनिरपेक्षः इत्येतयोः द्वयोः शब्दयोः समीक्षाह्वानं कृतम्। संविधानस्य प्रस्तावनायां एतयोः शब्दयोः प्रयोगः आपात्कालावधौ कृतमासीत्, अथ एतौ शब्दौ भीमराव अम्बेडकर द्वारा निर्मितस्य संविधानस्य भागं नासीत्। आपतकालस्य पञ्चाशत् वर्ष पूर्त्यवसरे कार्यक्रमं एकं सम्बोधयने राष्ट्रियस्वयंसेवक संघस्य महासचिवः दत्तात्रेयः होसबोले इत्यसौ प्रतिपादितवान् यत् भीमराव-अम्बेडकस्य संविधानस्य प्रस्तावनायां एतयोः शब्दयोः प्रयोगः नैवः कृतः।

## अमरनाथ-यात्राः

जम्मू-कश्मीरस्य उपराज्यपालः मनोजसिन्हावर्यः श्रीनगरस्थे राजभवने राजनीतिक-नेतृभिः समं उपवेशन कृतवान्, अथ जुलाईमासे समायोक्ष्यमाणायाः अमरनाथयात्रायाः सुरक्षा-सज्जाविषये चर्चां कृतवान। उपवेशने एतस्मिन् जम्मू-कश्मीरस्य मुख्यमन्त्री उमरअब्दुल्ला, भारतीयजनतापार्टीदलस्य, कांग्रेसदलस्य, पीडीपी दलस्य नेतारः सम्मिलिताः। उपराज्यपालेन अमरनाथ-श्राइन-बोर्ड इत्येतेन, जम्मू-कश्मीर आरक्षिबलैः, सर्वैः हितधारकैः पवित्रयात्रायाः सुरक्षित-सफल-संचालनाय कृताः प्रयासाः विनिमयीकृताः। उपराज्यपालेन निगदितं यत् बाबा-अमरनाथ आशिषा साम्प्रतिकी तीर्थयात्रा एषा स्मृतिपूर्णा आध्यात्मिकरूपेण सफला समृद्धा च भविष्यति।

## ऋतु विज्ञान

भारतीय-ऋतु-विज्ञान विभागेन ज्ञापितं यत् आगामि-द्वि-त्रि-दिनेषु उत्तरीराजस्थानं, पंजाब, हरियाणा-दिल्ली-प्रदेशेषु च अतिवृष्टिः सम्भाविता। विभागानुसारेण पूर्वीराजस्थान-गुजरात-उत्तराखण्ड-पश्चिम मध्यप्रदेशस्य भिन्नेषु भागेषु अद्य

अतिवृष्टिः भवितुं शक्यते। तटीय-कर्णाटक-केरल-गोवा-कोंकण-मध्यमहाराष्ट्रे च सममेव सम्भावना प्रकटिता।